भोगगृहं, क्ली, (भोगार्थं गृहम् ।) वासगृहम् । यथा,—
"वासागारं भोगगृहं कन्यायन्त्राटनिष्कुटाः ।"
इति हेमचन्द्रः ॥

भोगदेहः, पुं, (भोगहेतुको भोगसाधको वा देहः ।) स्वर्गनरकभोगार्थं सूक्ष्मशरीरम् । यथा,—
"कृते सपिण्डीकरणे नरः संवत्सरात् परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥"
इति श्राद्धतत्त्वम् ॥

अपि च ।
"शृणु देहविवरणं कथयामि यथागमम् ।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम् ।
देहिनां देहबीजञ्च स्रष्टुः सृष्टिविधौ परम् ॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत् ।
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह ॥
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः कृतः ।
बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे ॥
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये ।
जले न नष्टो देही वा प्रहारे सुचिरे कृते ॥
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा ।
तप्तद्रवे तप्तलोहे तप्तपाषाण एव च ॥
प्रतप्तप्रतिमाश्लेषेऽप्यत्यूर्द्ध्वपतनेऽपि च ।
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च ।
कथितं देहवृत्तान्तकारणञ्च यथागमम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्यायः ॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति । भोग+पालि+अण् ।) अश्वरक्षकः । इति शब्दमाला ॥ भोगरक्षके त्रि ॥

भोगपिशाचिका, स्त्री, (भोगे पिशाचिका इव, तद्दरत्वप्रत्वात् ।) क्षुधा । इति हारावली ॥

भोगभूमिः, स्त्री, (भोगार्थैव भूमिः ।) सुखस्थानम् । भारतवर्षातिरिक्तवर्षम् । यथा,—
"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः ॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः ॥

भोगवती, स्त्री, (भोगः सर्पशरीरं भूम्ना अस्त्यस्या मिति । भोग+मतुप् मस्य वः । "शार्ङ्गरवाद्यञो ङीन् ।" ४ । १ । ७३ । इति ङीन् ।) पातालगङ्गा । नागपुरी । इति मेदिनी । ते, २१४ ॥ (नागपत्नी । यथा महाभारते । १ । १०२ । ३२ ।
"नच भोगवतीं मन्ये न गन्धर्व्वीं न मानुषीम् ।"
गङ्गा । यथा, च काशीखण्डे । २६ । १२८ ॥
"भव्या भोगवती भद्रा भवानी भूतभाविनी ।"
तीर्थभेदः । यथा, महाभारते । ३ । ८५ । ७५ ॥
"तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः ।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूम्ना अस्त्यस्येति । भोग+मतुप् मस्य च वत्वम् ।) सर्पः । इति मेदिनी । ते, २१४ ॥ नाट्यम् । गानम् । इति त्रिकाण्डशेषः ॥ भोगविशिष्टे त्रि ॥

भोगसद्म, [न्] क्ली, (भोगार्थं उपभोगार्थं सद्म ।) वासगृहम् । यथा,—
"गर्भागारं वासगृहं भोगसद्मापवाधकम् ।"
इति शब्दरत्नावली ॥

भोगार्हं, क्ली, (भोगाय अर्हतीति अर्ह+"अर्हलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) धान्यम् । इति राजनिर्घण्टः ॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिर्यस्याम् ।) स्तुतिपाठकस्य स्तुतिः । इति जटाधरः ॥ (यथा माघे । ५ । ६७ ।
"भोगावलीः कलगिरोऽवसरेषु पेठुः ।"
भोगावलीः प्रबन्धान् । इति तट्टीकायां मल्लिनाथः ॥) नागपुरी । इति हेमचन्द्रः ॥

भोगावासः, पुं, (आवसत्यस्मिन् इति । आ+वस्+अधिकरणे घञ् । भोगार्थो वा आवासः ।) वासगृहम् । इति हारावली ॥

भोगिकः, पुं, (भोगे अश्वभोगे नियुक्त इति । भोग+बाहुलकात् ठन् ।) अश्वरक्षकः । इति शब्दमाला ॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः ।) वायुः । इति त्रिकाण्डशेषः ॥

भोगिनी, स्त्री, (भोगः अस्या अस्तीति । भोग+इनिः । ङीप् ।) महिषीभिन्ननृपपत्नी । इत्यमरः । २ । ६ । ५ ॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम् ।) चन्दनम् । इति राजनिर्घण्टः ॥

भोगी, [न्] पुं, (भोगोऽस्यास्तीति । भोग+इनिः ।) सर्पः । इत्यमरः । १ । ७ । ८ । (यथा, विष्णुपुराणे । १ । ३ । २३ ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतः शेते त्रैलोक्यग्रासबृंहितः ॥"
भोगयुक्तः । यथा, आर्य्यासप्तशत्याम् । ४१४ ।
"भवताश्लिष्टे भुजङ्गी जातः किल भोगिचक्रवर्त्ती त्वम् ॥")
ग्रामपात्रः । नृपः । इति मेदिनी । ने, । १०२ । नापितः । इति विश्वः ॥ वैयावृत्तिकरः । इति हेमचन्द्रः ॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोगीशः, पुं, (भोगिनामीशः ।) अनन्तदेवः । इति शब्दरत्नावली ॥

भोग्यं, क्ली, (भुज+ण्यत् ।) धनम् । धान्यम् । इति राजनिर्घण्टः ॥ भोगमर्हतीति । भोग+यत् । भोगार्हे त्रि ॥ (यथा, कामन्दकीये । ५ । ८१ ।
"यथा रक्षेच्च निपुणं शस्यं कण्टकिशाखया ।
फलाय वगुरुः कार्य्यस्तद्वद्भोग्यमिदं जगत् ।")
आधिभेदः । यथाह नारदः ।
"विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च ।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः ॥
कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ॥"
गोप्यो रक्षणीयः । भोग्यस्यार्थः फलभोग्यपदे द्रष्टव्यः । तद्यथा,—
"काले कालकृतो नश्येत् फलभोग्यो न नश्यति ।"
फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । इति मिताक्षरायां व्यवहाराध्यायः ॥

भोग्या, स्त्री, (भुज्+कर्म्मणि ण्यत् टाप् ।) वेश्या । इति राजनिर्घण्टः ॥ भोग्या भूः । इति वोपदेवः ॥ (तत्र त्रि ।)

भोजः, पुं, (भोजस्येदमिति । भोज+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् । अणो लोपः ।) स्वनामख्यातदेशः । भोजपुर इति भाषा । तत्पर्य्यायः । भोजकटः २ । इति शब्दरत्नावली ॥ धारानगरस्य राजविशेषः । तस्य वृत्तान्तो यथा । धारानामनगर्य्यां सिन्धुलसंज्ञो राजा आसीत् । तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनामपुत्रो जातः । स यदा पञ्चवर्षवयस्कस्तदा तत्पिता आत्ममरणकालं विदित्वा भ्रात्रे मुञ्जाय राज्यं ददौ, तद्उत्सङ्गे भोजञ्च मुमोच । ततो राज्ञि परलोकं प्राप्ते कियत्कालानन्तरं सभायां कश्चिदुदरम्भरिर्ज्योतिर्विदागत्य मुञ्जं प्राह राजन् ! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि न समर्थः कोऽहं वराक उदरम्भरिर्ब्राह्मणः तथापि वदामि भोजमितः प्रेषय । ततो राजाज्ञया भोजेऽध्ययनशालां प्राप्ते आह यथा,—
"पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोगराजेन भोक्तव्यं सगौड़ं दक्षिणापथम् ॥"
इति श्रुत्वा मुञ्जराजोऽचिन्तयत्, यदि राजलक्ष्मीर्भोजं गमिष्यति ततोऽहं जीवन्नपि मृतः । ततो राजा मन्त्रयित्वा वङ्गालाधीश्वरं महाबलं वत्सराजमाहूय निर्ज्जने तं प्राह, वत्सराज ! त्वया भोजस्त्रिभुवनेश्वरीविपिने हन्तव्यः । वत्सराजः भोजकुमारोपाध्यायमाहूय प्राह, विप्र ! भोजमानय । ततो विदितवृत्तान्तो भोजः कुपितः प्राह, आः पाप ! राज्ञः कुमारं बहिरानेतुं तव का शक्तिः, ततो वामचरणपादुकामादाय भोजेन भालदेशे हतो वत्सराजः प्राह, भोजकुमार ! वयं राजादेशकारिणः । इत्युक्त्वा वधार्थं बलात् वत्सराजेन निशायां विपिनं भोजे नीते वत्सराजस्य भ्राता भोजस्य वधोद्यमसमये ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यच्च गच्छति ॥"
इत्युक्तं निशम्य वत्सराजो वैराग्यमापन्नो भोजं क्षमस्वेत्युक्त्वा प्रणम्य तं रथे निवेश्य गृहमागत्य भूमिगृहान्तरे भोजं रक्षित्वा कृत्रिमं भोजमस्तकं कारयित्वा राजानमागत्य नत्वा प्राह श्रीमता यदादिष्टं तन्मया कृतम् । राजपुत्रवधं ज्ञात्वा राजा तं प्राह वत्सराज ! पुत्रेण खड्गप्रहारावसरे किमपि उक्तम् । वत्सराजः प्राह देव ! किमपि पत्रं प्रेषितमस्ति तदिदं गृहाण शिरश्च दर्शयति । ततो भोजमस्तकं दृष्ट्वा राजा रुरोद ।